RKMVERI/DSS/MAIS/16-21/D2018/UT-1/SK-101

## SK-101 कठोपनिषत् शाङ्करभाष्योपेता

कालावधिः - होरा　　　　　　दिनाङ्कः 1-8-2018　　　　　　अङ्काः - 25

---

**A) अत्र यथेष्टं पञ्च मन्त्रान् पूरयत।**　　　　**1*5=5**

1) उशन् ह ..............॥
2) स होवाच पितरं .......॥
3) यथा पुरस्ताद् .........॥
4) प्र ते ब्रवीमि .................॥
5) त्रिणाचिकेतस्त्रयम्...........॥
6) देवैरत्रापि ...किल............॥
7) तिस्रो रात्रीर्यदवात्सीर्गृहे.....॥

**B) अधस्ताद् यथेच्छं पञ्च प्रश्नान् उत्तरत।**　　　　**1*5=5**

1) कठोपनिषदः अधिकारी कः?
2) बहूनामेमि प्रथमः - कः अर्थः?
3) प्रथमवरेण नचिकेताः किमवृणोत् ?
4) भोगाः किं कुर्वन्ति ?
5) क्वधस्थः इत्यस्य कोऽर्थः?
6) विवेकी दीर्घजीविते कुतो न रमेत ?
7) कस्मादन्यं नचिकेता न वृणीते ?

**C) अधःस्थितेषु यथेच्छं प्रश्नत्रयं भाष्यदिशा उत्तरत।**　　　　**3*3=9**

1) ब्रह्मजज्ञः देवः कः?
2) सस्यमिव मर्त्यः पच्यते इत्यादिमन्त्रभागस्य किं तात्पर्यम् ?
3) अनश्नन् ब्राह्मणो अतिथिर्गृहे वसति चेत् का हानिः?
4) स्वर्ग्यः अग्निः कुतः लोकादिरुच्यते ?
5) वरत्रयमतिरिच्य किं किं दत्तं यमेन ?

**D) नीचैः दत्तयोः अनुप्रियम् एकम् अनुबध्नीत।**　　　　**6*1=6**

1) नचिकेतसः श्रद्धावैभवम्।
2) उपनिषच्छब्दार्थः।

***

RKMVERI/DSS-WW/MAIS/16-20/D2018/UT-1/SK-101

**SK-101 कठोपनिषत्(शाङ्करभाष्यसमेता)**

Duration – 1 Hour | Full Marks - 25

**A) एकेन वाक्येन समाधत्त। 1x8=8**

1) आशाप्रतीक्षे ...........ब्राह्मणो गृहे।
2) यस्मिन्निदं.......... नचिकेता वृणीते।
3) शतायुषः................यावदिच्छसि।
4) यथा..............मृत्युमुखात् प्रमुक्तम्।
5) प्रतीक्षा नाम का ?
6) वाजश्रवसः पुत्र कः ?
7) सत्यसङ्कल्पः कः ?
8) आख्यायिका नाम का ?
9) श्रद्धा नाम का ?
10) सृङ्का नाम का ?
11) नचिकेतसा प्रार्थितः द्वितीयः वरः कः ?

**B) चतुर्णां प्रश्नानामुत्तरं समासेन विवृणुत। 3x4=12**

1) कः मृत्युपाशाान् अपहाय स्वर्गलोके मोदते ?
2) "त्रिणाचिकेतस्त्रिभिरेत्य......." इत्यत्र त्रिणाचिकेतशब्दस्य कोऽर्थः ?
3) "श्वोभावा मर्त्यस्य......." इत्यस्य मन्त्रस्य आशयं लिखतु ?
4) नचिकेतसा प्रार्थितं द्वितीयं वरं विवृणुत ?
5) स्वर्गलोकः कीदशो भवति ?
6) अनन्दानामकान् लोकान् कः प्राप्नोति ?
7) "जीर्यन् मर्त्यः क्वधःस्थः प्रजानन्......." इत्यत्र क्वधःस्थशब्दस्य भाष्योक्तौ अर्थौ कौ ?

**C) एकं विशादयत। 5x1=5**

1) "येयं प्रेते विचिकित्सा मनुष्ये......." इत्यमुं मन्त्रार्थं भाष्योक्तदिशा व्याख्यात ?
2) कठोपनिषदः भूमिकाभाष्योक्तम् उपनिषच्छब्दार्थं विवृणुत ?

***

RKMVERI/DSS/MAIS/16-21/D2018/UT1/SK-102

## SK- 102 ईशोपनिषत् मुण्डकोपनिषत् च।

कालावधिः - एकहोरा पूर्णाङ्काः - 25

---

**A) सप्तसु पञ्चैव समाधेयाः। 1*5=5**

1) कर्मशेषता कस्य सम्भवति?
2) सर्वासामुपनिषदां केन उपक्षयः?
3) कः कर्मसु अधिक्रियते?
4) ईश्वरात्मभावनया युक्तस्य कुत्र अधिकारः ?
5) एषणात्रयसन्न्यासे कः अधिकृतः?
6) द्वाविमावथपन्थानौ....... पूरयत ।
7) आत्महनः के?

**B) सप्तसु पञ्च समाधत्त। 3*5=15**

1) ईशावास्यमित्यादि मन्त्राणां कुत्र विनियोगः ?
2) "असूर्या नाम ते" इत्यादि मन्त्रोक्तामविद्वन्निन्दां दर्शयत।
3) परिव्राट् मुमुक्षुः कुतो न विजुगुप्सते?
4) कर्मणः देवताज्ञानस्य च समुच्चयं प्रदर्शयत ।
5) अव्याकृतोपासनायाः व्याकृतोपासनायाश्च समुच्चयं गमयत।
6) आत्मनः मोक्षप्राप्तिद्वारयाचनं समन्त्रं व्याख्यात।
7) अग्ने नय सुपथा इत्यादि मन्त्रार्थं विवृणुत।

**C) द्वयोरेकं समाधत्त। 1*10=10**

1) ज्ञाननिष्ठाकर्मनिष्ठयोः विभागप्रदर्शनपुरस्सरं ईशावास्यम्- कुर्वन्नेहेत्येतत् मन्त्रद्वयं व्याख्याता
2) अनेजदेकमित्यादि मन्त्रैः जिज्ञास्यात्मस्वरूपं गमयत।

***

RKMVERI/DSS/MAIS/15-20/D2018/UT1/SK-103

## SK- 103 छान्दोग्योपनिषत् शाङ्करभाष्यसहिता

कालावधिः - एकहोरा पूर्णाङ्काः - 25

---

**A) षट्सु पञ्चैव समाधेयाः।** **1*5=5**

1) तज्जलानित्यस्य अर्थः कः?
2) एकभुक्तेन सर्वतृप्तिः कदा?
3) अनूचानः इत्यस्य अर्थः कः?
4) वाचारम्भणं किमित्युच्यते?
5) असतः सज्जायते इति केषां मतम्?
6) तदैक्षत इत्यत्र तच्छब्देन कस्य परामर्शः?।

**B) षट्सु पञ्च समाधत्त।** **1*5=5**

1) संवृतिः नाम का?
2) अशितस्यान्नस्य त्रेधा विभागः कथम्?
3) प्रतिज्ञावाक्यं किम्?
4) सदेव सोम्य इत्यत्र सच्छब्दवाच्यं किम्?
5) त्रिवृत्करणस्य उपलक्षणं किम्?
6) भूतानां बीजानि कति? कानि च तानि?

**C) पञ्चसु त्रीन् समाधत्त।** **5*3=15**

1) सदेव सोम्येत्यादि श्रुतिवाक्यं यथाभाष्यं व्याख्यात।
2) प्रतिज्ञाग्रन्थं सोदाहरणं सप्रसङ्गं विशदयत।
3) त्रिवृत्करणं यथोपनिषत् व्याख्यात।
4) तेजोदृष्टान्तेन प्रतिज्ञां द्रढयत।
5) वाक्प्राणमनसामन्निष्ठत्वं यथोपनिषत् गमयत।

***

RKMVERI/DSS/MAIS/14-19/D2018/UT-1/SK-106

**SK-106 विषयः-माण्डुक्योपनिषत्**

Duration – 1 Hours | Full Marks - 25

**A) एकेन वाक्येन समाधत्त। 1x5=5**

1) सर्वभावानां प्रभवः कः ?
2) आत्मनः चतुष्पात्त्वे किमुदाहरणम् ?
3) सांख्यादिभिः दृष्टः आत्मा कीदृशः ?
4) विविक्तो भोगः कस्य भवति ?
5) कर्मसाधनः पादशब्दः कस्य ?
6) ओङ्काराभिधेयः कः ?
7) न प्रज्ञानधनम् इत्यनेन कस्य प्रतिषेधः ?

**B) पञ्च समासेन विवृणुत। 3x5=15**

1) चतुर्णां प्रकरणानां प्रत्येकं प्रयोजनं वदत ।
2) द्युलोकादीनां विश्वस्य मूर्धाद्यङ्गत्वं निरूपयत ।
3) ओमित्येतदक्षरमिदमित्यादिमन्त्रं विवृणुत ।
4) सृष्टिविषये विमतानि, कारिकाकारमतं च प्रतिपादयत ।
5) मन्त्रतद्भाष्यतात्पर्येण तैजसं परिचाययत ।
6) प्रतिषेधविज्ञानस्य तुरीये न व्यापारोपपत्तिः, साधयत ।
7) अव्याकृतस्य प्राणशब्दवाच्यत्वमाशङ्क्य, उपपादयत ।

**C) एकं विशादयत। 5x1=5**

1) ग्रन्थोक्तरीत्या तुरीयं विवृणुत ।
2) ग्रन्थोक्तरीत्या प्राज्ञं विशदयत ।

***

RKMVERI/DSS/MAIS/14-19/D2018/UT1/SK-108

**SK- 108 प्रश्नोपनिषत् शांकरभाष्यम्**

कालावधिः - एकहोरा पूर्णाङ्काः - 25

---

**A) सप्तसु पञ्चैव समाधेयाः।** **1*5=5**

1) भारद्वाजादयः ब्रह्मपराः ब्रह्मनिष्ठाः इत्यादिस्थले ब्रह्मशब्दार्थः कः?

2) युवसंज्ञकः कः?

3) यदि विज्ञास्यामः इत्यत्र यदि पदं किमर्थम्?

4) कबन्धीकात्यायनस्य प्रश्नः कः?

5) प्राणः रयिश्च कौ भवतः?

6) चान्द्रमसं लोकं के अभिजयन्ते?

**B) सप्तसु पञ्च समाधत्त।** **3*5=15**

1) सुकेशादीनां गुरूपसत्तिं वर्णयत।

2) विश्वरूपं हरिणमित्यादि मन्त्रं व्याख्यात।

3) संवत्सरादिषु प्रजापतिदृष्टिं व्याख्यात।

4) पञ्चपादं पितरमित्यादिमन्त्रेण आदित्यस्य सर्वाधिष्ठानतां गमयत।

5) प्रजापतिव्रतफलं दर्शयत।

6) भार्गवप्रश्नमुपस्थापयत।

7) शरीराधारभूतानामाकाशादीनां परिचयं कारयत।

**C) द्वयोरेकं समाधत्त।** **1*10=10**

1) प्राणप्रधानतामाख्यायिकाद्वारा व्याख्यात।

2) कात्यायनप्रश्नं यथोपनिषद्भाष्यं समाधत्त।

***

RKMVERI/DSS/MAIS/14-19/D2018/UT-1/SK-125

## SK-125 श्रीमद्भगवद्गीता

Duration – 1 Hours | Full Marks - 25

**A) एकेन वाक्येन समाधत्त।** **1x5=5**

1) भगवान् प्रवृत्तिधर्मं किमर्थं ग्राहयामास?
2) कीदृशं मनः आत्मदर्शने करणम् ?
3) का नाम सद्बुद्धिः ?
4) अचिन्त्योऽयमात्मा, कुतः ?
5) पण्डितशब्दस्य निर्वचनं कथम् ?
6) केन हेतुना शास्त्रम् आत्मनि प्रमाणं भवति ?
7) धर्मलक्षणं किम्?

**B) समासेन विवृणुत।** **3x5=15**

1) तान् तितिक्षस्व भारत, स्पष्टयत ?
2) आत्मविषये धीराणां कीदृशी धारणा भवति ?
3) भगवान् द्वे निष्ठे कुतः प्रविभज्य कथयति ?
4) लौकिकन्यायेन युद्धस्य कर्तव्यत्वं समर्थयत ?
5) जनकादीनां कर्मणा संसिद्धिः कथं व्याख्येया ?
6) कृष्णः देवक्यां किमर्थं सम्बभूव ?
7) आत्मनः षड्विक्रियाभावं साधयत ?

**C) एकं विशादयत।** **5x1=5**

1) नासतो विद्यते भावो नाभावो विद्यते सतः ?
2) ज्ञानकर्मणोः भिन्नकर्तृकत्वम् ?

***

RKMVERI/DSS/MAIS/15-20/D2018/UT-1/SK-132

**SK-132, ब्रह्मसूत्रे १.३,४ सशाङ्करभाष्यम्।**

लेखनाय कालः – होरा।　　　　दिनाङ्कः – ०९/०८/२०१८　　　　पूर्णाङ्काः - 25

---

**A) षट् प्रश्नान् यथानिर्देशम् उत्तरयत ।**　　　　**१ x ६ = ६**

1) द्युभ्वादिसूत्रे कः स्वशब्दः।
2) द्युभ्वाद्यधिकरणस्य विषयवाक्यं किम्।
3) सेतुशब्दव्युत्पत्तिम् प्रदर्शयत।
4) मुक्तोपसृप्यव्यपदेशात् – सूत्रार्थः कः।
5) नानुमानमतच्छब्दात् – सूत्रार्थः कः।
6) अक्षरमम्बरान्तधृतेः – सूत्रार्थः कः।
7) स्थित्यदनाभ्याञ्च – सूत्रार्थः कः।
8) सम्प्रसादशब्देन प्राणः कथमवगम्यते।

**B) त्रीन् प्रश्नान् समाधत्त**　　　　**३ x ३ = ९**

1) सा च प्रशासनात् – व्याख्यात।
2) एष तु वा अतिवदति यः सत्येनातिवदतीति वाक्यस्य पूर्वपक्षानुसारिणं सिद्धान्तानुसारिणञ्च दृष्टान्तं दर्शयत।
3) प्रकरणतात्पर्यलिङ्गैः प्राणविज्ञानसम्बन्धः अतिवादित्वेन सह नास्तीति कथम् प्रदर्शितम् भगवत्पादैः।
4) अक्षराधिकरणस्य सिद्धान्तः संक्षिप्यताम्।

**C) द्वावपि व्याख्यात ।**　　　　**५ x २ = १०**

1) भूमा सम्प्रसादादध्युपदेशात् – पूर्वपक्षं संक्षिपत।
2) भूमा सम्प्रसादादध्युपदेशात् – सिद्धान्तं संक्षिपत।

***

RKMVERI/DSS/MAIS/15-20/D2018/UT1/SK-133

**SK- 133 ब्रह्मसूत्रभाष्ये (२.१,२,३. पादाः)**

कालावधिः - एकहोरा पूर्णाङ्काः - 25

---

**A) षट्सु पञ्चैव समाधेयाः। 1*5=5**

1) तस्माद्व्यक्तमुत्पन्नमित्यत्र कपिलस्य ज्ञानातिशयवादिनी श्रुतिः का?

2) तत्वज्ञानं केभ्यः भवति?

3) ब्रह्मणः शरीरात्मकता कया श्रुत्या व्यपदिश्यते?

4) ईश्वरः किंसापेक्षः सृजति?

5) इतरेतराश्रयदोषः कुतो न भवति?

6) ईश्वरः कथं द्रष्टव्यः?सूत्रार्थं लिखत- स्वपक्षदोषाच्च।

**B) षट्सु पञ्च समाधत्त। 1*5=5**

1) सूत्रार्थं लिखत- स्वपक्षदोषाच्च

2) उपपद्यते चाप्युपलभ्यते च।

3) एतेन योगः प्रत्युक्तः।

4) आत्मनि चैवं विचित्राश्च हि।

5) आत्मनि चैवं विचित्राश्च हि।

6) किन्निमित्तः संसारः?

**C) पञ्चसु त्रीन् समाधत्त। 5*3=15**

1) इतरव्यपदेशाधिकरणसारं संगृह्णीत ।

2) कृत्स्नप्रसक्त्यधिकरणसारं व्याख्यात।

3) स्मृत्यधिकरणं यथाभाष्यमारचयत।

4) योगप्रत्युक्त्यधिकरणं यथाभाष्यं प्रतिपादयत।

5) वैषम्यनैर्घृण्याधिकरणं विशदयत।

***

RKMVERI/DSS/MAIS/14-19/D2018/UT-1/SK-135

**SK-135 ब्रह्मसूत्रम् III.2-3**

Marks-25 Date- 31/07/18

**A) वाक्येन वाक्याभ्यां वा उत्तरत। 1x5=5**

1) सन्ध्यमित्यस्य भाष्योक्तः अर्थः कः?
2) मायामात्रन्तु कात्स्न्र्येन ... इत्यत्र कात्स्न्र्यशब्देन किमभिप्रेतम्?
3) परस्य ब्रह्मणो देहादिषूपाधिष्वन्तरनुप्रवेशे श्रुतिप्रमाणं किम्?
4) पूर्वपक्षिमते जीवस्य सुषुप्तिस्थानं किम्?
5) कस्मात् कारणात् जीवः तिरस्कृतज्ञानैश्वर्यो भवति?
6) मूर्छावस्थायाः कुत्र अन्तर्भावः?
7) तृतीयं स्थानं किम्?

**B) अल्पाक्षरेण व्याख्यात । 3x5=15**

1) अतः प्रबोधोऽस्मात्।
2) मुग्धेऽर्धसम्पत्तिः।
3) स एव तु कर्मानुस्मृतिशब्दविधिभ्यः।
4) देहयोगाद्वा सोऽपि।
5) निर्मातारं चैके पुत्रादयश्च।
6) तदभावो नाडीषु तच्छ्रुतेरात्मनि च।

**C) लघुप्रबन्धं लिखत। 5x1=5**

1) स्वप्ने रथादिसृष्टिः पारमार्थिकी उत मायामयीति सन्ध्यधिकरणपर्यालोचनया विचारयत।

***

RKMVERI/DSS/MAIS/16-21/D2018/UT-1/SK-151

**SK-151 पञ्चदशी**

Marks-25 Date- 04/08/18 Marks - 25

**A) वाक्येन वाक्याभ्यां वा उत्तरत।** **1x5=5**

1) आत्मा परानन्दः कुतः?
2) पञ्चदशीग्रन्थस्य साम्प्रदायिकं व्याख्यानं किम्?
3) किं नाम जागरितम्?
4) सत्त्वशुद्धिः इत्यस्य कोऽर्थः?
5) सा अविद्या कारणशरीरं, कुतः?
6) अन्यत्र यत्प्रेम तदात्मार्थमित्यत्र किं श्रुतिप्रमाणम्?
7) सौषुप्तिकसंविदोऽस्तित्वे किं प्रमाणम्?

**B) अल्पाक्षरेण व्याख्यात ।** **3x5=15**

1) अभाने न परं प्रेम भाने न विषये स्पृहा।
2) शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक्।
3) सुप्तोत्थितस्य सौषुप्ततमोबोधो भवेत्स्मृतिः।
4) तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि।
5) सविलासमहामोहग्राहग्रासैककर्मणे।
6) तमोरजःसत्वगुणा प्रकृतिर्द्विविधा च सा।

**C) लघुप्रबन्धं लिखत।** **5x1=5**

1) जीवस्य अवस्थात्रयं विचार्य, तत्र संविदेकत्वं यथाग्रन्थं निरूपयत।

***

RKMVERI/DSS/MAIS/15-20/D2018/UT-1/SK-164

## SK-164 वेदान्तपरिभाषा-II

Marks-25 Date-01/08/18 पूर्णाङ्काः - 25

---

**A) वाक्येन वाक्याभ्यां वा उत्तरत।** **1x5=5**

1) कीदृशं वाक्यं प्रमाणम्?
2) का नाम आकाङ्क्षा?
3) बलाबलाधिकरणे किं निश्चितम्?
4) किं नाम तात्पर्यं सिद्धान्ते?
5) लक्षितलक्षणा नाम का?
6) आसत्तेः लक्षणं किम्?
7) को नाम अर्थवादः?

**B) अल्पाक्षरेण व्याख्यात ।** **3x5=15**

1) तात्पर्यसंशयविपर्ययोत्तरशाब्दज्ञानविशेषे च तात्पर्यज्ञानं हेतुरेव।
2) लक्षणा च न पदमात्रवृत्तिः।
3) लक्षणाबीजं तात्पर्यानुपपत्तिरेव।
4) तत्त्वमसीति वाक्ये न लक्षणा।
5) तच्च जातेरेव न व्यक्तेः, व्यक्तीनामानन्त्येन गुरुत्वात्।
6) योग्यता च तात्पर्यविषयीभूत-संसर्गाबाधः।

**C) लघुप्रबन्धं लिखत।** **5x1=5**

1) वाक्यजन्यज्ञानकारणानि व्याख्यात।

***

RKMVERI/DSS/MAIS/14-19/D2018/UT-1/SK-167

## SK- 167, सिद्धान्तलेशसङ्ग्रहे प्रथमपरिच्छेदः।

लेखनाय कालः – होरा      दिनाङ्कः – ०९/०८/२०१८      पूर्णाङ्काः - 25

---

**A) षट् प्रश्नान् यथानिर्देशम् उत्तरयत ।**      **१ x ६ = ६**

1) परिसंख्याविधेः प्रथमविधायाः लक्षणं किम्।
2) परिसंख्याविधेः द्वितीयविधायाः लक्षणं किम्।
3) सिद्धान्तलेशसंग्रहस्य प्रथममङ्गलश्लोकं लिखत।
4) सिद्धान्तलेशसंग्रहस्य द्वितीयमङ्गलश्लोकं लिखत
5) अपूर्वविधिपक्षे भाष्यप्रमाणं किम्।
6) नियमविधिपक्षे भाष्यप्रमाणं किम्।
7) नियमविधिलक्षणं लिखत।
8) अपूर्वविधिलक्षणं लिखत।

**B) त्रीन् प्रश्नान् समाधत्त**      **३ x ३ = ९**

1) श्रवणविधौ संक्षेपशारीरककाराणां किम् मतम्।
2) विवरणैकदेशिनां श्रवणसम्बद्धानि मतानि संक्षिपत।
3) नियमपरिसंख्ययोः फलतो विवेको न युक्त इत्येतत् खण्डयत।
4) अपूर्वविधिपक्षं संक्षिपत।

**C) द्वावपि व्याख्यात ।**      **५ x २ = १०**

1) सदृष्टान्तम् परिसंख्याविधिलक्षणम्।
2) श्रवणे नियमविधिरिति पक्षः।

***

RKMVERI/DSS/MAIS/14-19/D2018/UT1/SK-171

**SK- 171 अद्वैतसिद्धिः।**

कालावधिः - एकहोरा                                                                 पूर्णाङ्काः - 25

---

**A) सप्तसु पञ्चैव समाधेयाः।**                                                 **1*5=5**

1) उपपादनं नाम किम?
2) वादः नाम कः?
3) जल्पः नाम कः?
4) व्युदसनीयतया इत्यस्य कः अर्थः?
5) विप्रतिपत्तिः नाम का?
6) प्रथममिथ्यात्वलक्षणं किम्?
7) प्रथममिथ्यात्वलक्षणे अर्थान्तरं कथम्?

**B) सप्तसु पञ्च समाधत्त।**                                                 **3*5=15**

1) विप्रतिपत्तेर्विचाराङ्गत्वं निराकुरुत।
2) कथात्रैविध्यं प्रदर्शयत।
3) ग्रन्थकर्तुः गुरूणां परिचयं समङ्गलश्लोकं कारयत।
4) मिथ्यात्वविषयिणीं विप्रतिपत्तिं प्रदर्श्य दलसार्थक्यं लिखत ।
5) पक्षतावच्छेदकं विचारयत।
6) पक्षतास्वरूपं वर्णयत।
7) मंगलश्लोकं व्याख्यात।

**C) द्वयोरेकं समाधत्त।**                                                 **1*10=10**

1) प्रथममिथ्यात्वलक्षणे पूर्वपक्षं संगृह्णीत।
2) विप्रतिपत्तेर्विचाराङ्गत्वं साधयत।

***

## SK-182 पञ्चपादिका

Marks-25 Date- 10/08/18 पूर्णाङ्काः - 25

---

**A) वाक्येन वाक्याभ्यां वा उत्तरत। 1x5=5**

1) 'मिथ्याज्ञाननिमित्त' इत्यस्य कोऽर्थः?
2) भाष्यारम्भे कीदृशं मङ्गलं विहितम्?
3) अध्यासभाष्ये विषयप्रयोजननिर्देशः कथं कृतः?
4) अध्यासस्य अनादित्वं कथम्?
5) मिथ्येति भवितुं युक्तमित्यत्र मिथ्याशब्दार्थः कः?
6) अध्यासः नैसर्गिक इत्यस्य कोऽर्थः?

**B) अल्पाक्षरेण व्याख्यात । 3x5=15**

1) विना विनायकमपूर्वशङ्करम्।
2) अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नमः।
3) अनर्थश्च प्रमातृताप्रमुखं कर्तृत्वभोक्तृत्वम्।
4) अग्रणीः शिष्टाचारपरिपालने भगवान् भाष्यकारः।
5) मिथ्येति अनिर्वचनीयता उच्यते।
6) अनन्दो विषयानुभवो नित्यत्वमिति सन्ति धर्माः।

**C) लघुप्रबन्धं लिखत। 5x1=5**

1) पञ्चपादिकादिशा विषयविषयिणोरितरेतरभावानुपपत्तिं वर्णयत।

***

RKMVERI/DSS/MAIS/16-21/D2018/UT-1/SK-201

## SK-201 सिद्धान्तकौमुद्याम् सञ्ज्ञाप्रकरणात् स्वादिसन्धिप्रकरणं यावत्

समयावधिः – एकहोरा पूर्णाङ्काः - 25

---

**A) अत्र यथेष्टं षण्णां प्रश्नानाम् उत्तरं लिखत ।** **1x6=6**

1) मुनित्रयम् इत्यत्र नमः योगे चतुर्थीविभक्तिः कुतो न ?
2) साम्प्रतिके काले कथं ज्ञायते अयं वर्णः अनुनासिक इति ?
3) अनुनासिक इत्यादिनिर्देशात् किं ज्ञायते ?
4) मुखनासिकावचनो इत्यस्य ससूत्रं समासविग्रहं निरूपयत ।
5) झकारस्य उच्चारणस्थानं तथा अभ्यान्तरवाह्यप्रयत्नञ्च लिखत ।
6) ऋलृवर्णयोः इत्यस्य विग्रहः कः ?
7) इको गुणवृद्धी इत्यस्य उदाहरणपुरस्सरं अर्थं लिखत ।
8) अनेकविधमान्तर्यं प्रतिपादयत ।

**B) काञ्चन त्रयान् समाधत्त ।** **3x3=9**

1) अन्योन्याश्रयदोषम् उद्भाव्य परिहरत ।
2) तुल्यास्य प्रयत्नं सूत्रं व्याख्यात ।
3) नाज्झलौ इति सूत्रं व्याख्याय आकरप्रश्लेशस्य कारणं निरूपयत ।
4) आद्यन्तौ टकितौ इति सूत्रं सोदहरणं व्याख्यात ।
5) स्वं रूपं शब्दस्याशब्दसञ्ज्ञा इति सूत्रं सोदहरणं प्रतिपादयत ।

**C) एषु यथेष्टं प्रश्नद्वयस्य व्याख्यानं कुरुत ।** **5x2=10**

1) खयां यमाः इति कारिकां विलिख्य विशदयत ।
2) येन विधिस्तदन्तस्य इति सूत्राशयं यथाकौमुदी निरूपयत ।
3) मिदचोऽन्त्यात्परः इति सूत्रं व्याख्यायत ।

***

## SK-201 सिद्धान्तकौमुदी पञ्चसन्ध्यन्ता।

कालावधिः - एकहोरा | दिनाङ्कः 31.7.2018 | पूर्णाङ्काः - 25

---

**A) अष्टसु षट् समाधेयाः।** **1*6=6**

1) वल् इति प्रत्याहारे कति वर्णाः आगच्छन्ति।
2) हल् इति प्रत्याहारे के वर्णाः आगच्छन्ति।
3) पदसंज्ञाविधायकं सूत्रं लिखत।
4) अकारस्य कति भेदाः भवन्ति।
5) उच्चैरुदात्तः इति सूत्रस्यार्थं लिखत।
6) गुणसंज्ञाविधायकं सूत्रं लिखत।
7) शलाम् आभ्यन्तरप्रयत्नः कः।
8) ककारस्य बाह्यप्रयत्नाः के सन्ति।

**B) पञ्चसु त्रयं समाधत्त।** **3*3=9**

1) शिवो वन्द्यः इत्यस्य ससूत्रं सिद्धिः कार्या।
2) शिवोऽर्च्यः इत्यस्य ससूत्रं सिद्धिं लिखत।
3) मनोरथः इत्यस्य ससूत्रं सिद्धिः कार्या।
4) देवा हसन्ति इति प्रयोगं ससूत्रं साधयत।
5) हरी रम्यः इति प्रयोगं ससूत्रं साधयत।

**C) चतुर्षु द्वयं समाधत्त।** **5*2=10**

1) आदिरन्त्येन सहेता इति सूत्रं सोदाहरणं व्याख्यात।
2) हलन्त्यम् इति सूत्रस्य व्याख्यां कुरुत।
3) मुखनासिकावचनोऽनुनासिकः इति सूत्रं व्याख्यात।
4) ऊकालोज्झस्वदीर्घप्लुतः इति सूत्रस्य व्याख्यां कुरुत।

***

RKMVERI/DSS/MAIS/16-21/D2018/UT-1/SK-205

## SK-205 सिद्धान्तकौमुद्यामजन्तपुंलिङ्गप्रकरणाद्

Time – One hour                                                                                    Marks – 25

---

**A) यथेष्टं षण्णाम् एकेन वाक्येन उत्तरं लिखत-** **1x6=6**

1) ङ्याप्प्रातिपदिकात् इति सूत्रे ङ्याब्ग्रहणं किमर्थम् ?
2) कयोः विभक्तिसंज्ञा भवति ?
3) तस्माच्छसो नः पुंसि। कस्मात् ?
4) अङ्गसंज्ञासूत्रे विधिग्रहणं किमर्थम् ?
5) रामस्स्य इत्यत्र सस्य चर्त्वेऽपि न तकारः। कुतः ?
6) आदेशप्रत्यययोः इत्यत्र कस्मात् सः इत्यनुवर्तते ?
7) सर्वनामसंज्ञा तदन्तस्यापीत्यत्र ज्ञापकं किम् ?
8) आमि सर्वनाम्नः सुट् इत्यस्य कोऽर्थः ?

**B) यथेष्टं त्रयाणां प्रशनानां उत्तरं लिखत-** **3x3=9**

1) तच्चाकर्तुं शक्यम्। अयोगवाहानामह्णूक्तत्वात्। विशदयत।
2) अत एव सः सि इति तादेशः आरभ्यते।
3) 'तदन्तस्यापीयं संज्ञा।' का ? कथम् ?
4) रामाणाम्। रूपं ससूत्रं साधयत।
5) सर्वेषाम्। रूपं ससूत्रं साधयत।

**C) द्वयोः उत्तरं लिखत-** **5x2=10**

1) एङ्ह्रस्वात्संबुद्धेः।
2) अतो गुणे।
3) आदेशप्रत्यययोः।

***

## SK-205 सिद्धान्तकौमुद्यामजन्तपुंलिङ्गप्रकरणाद्

Time – One hour | Marks – 25

**A) यथेष्टं षण्णाम् एकेन वाक्येन उत्तरं लिखत-** **1x6=6**

1) समासग्रहणं नियमार्थम्। कः नियमः ?
2) कयोः विभक्तिसंज्ञा भवति ?
3) 'जस्' इत्यत्र जकारस्य इत्संज्ञा केन सूत्रेण ?
4) अतो गुणे इत्यनेन किं विधीयते ?
5) तस्माच्छसो नः पुंसि। कस्मात् ?
6) अङ्गसंज्ञासूत्रे तदादिग्रहणं किमर्थम् ?
7) सन्निपातपरिभाषायाः अनित्यत्वस्य ज्ञापकः कः ?
8) रामाणामित्यत्र सुपि च कुतो न प्रवर्तते ?

**B) यथेष्टं त्रयाणां प्रशनानां उत्तरं लिखत-** **3x3=9**

1) तेन वाक्यस्य न। विशदयत।
2) अत एव सः सि इति तादेशः आरभ्यते।
3) नामीत्यनेन त्वारम्भसामर्थ्यात्परिभाषा बाध्यते।
4) रामाणाम्। रूपं ससूत्रं साधयत।
5) रामाय। रूपं ससूत्रं साधयत।

**C) द्वयोः उत्तरं लिखत-** **5x2=10**

1) एङ्ह्रस्वात्संबुद्धेः।
2) यस्मात्प्रत्ययविधिः तदादिप्रत्ययेऽङ्गम्।
3) बहुवचने झल्येत्।

***

## SK-209 (सिद्धान्तकौमुद्यां कारकप्रकरणम्)

समयावधिः-एकहोरा | सत्रम् ३ | पूर्णाङ्काः-२५

---

**A) दश समाधेयाः** **१ x १० = १०**

1) प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे इत्यत्र कः विग्रहः?
2) मात्रपदस्य प्रत्येकं सम्बन्धः कथम्?
3) लिङ्गमात्राधिक्ये प्रथमा इत्यस्योदाहरणं किम्?
4) द्रोणो व्रीहिः इति वाक्यस्य कोऽर्थः?
5) हे राम इत्यत्र राम इति पदे का विभक्तिः केन सूत्रेण?
6) माषेषु अश्वं बध्नाति इत्यत्र माषाः कस्य ईप्सिताः?
7) अकथितं च इत्यस्य कोऽर्थः?
8) बलिं भिक्षते वसुधाम् इत्यत्र भिक्षधातोः योगे कथम् अपादानस्य अविवक्षा?
9) व्रजम् अवरुणद्धि गाम् इत्यत्र व्रजं कीदृशं कारकम्?
10) तण्डुलान् ओदनं पचति इत्यत्र तण्डुलः कीदृशं कारकम्?
11) विषं भुङ्क्ते इत्यत्र विषं कीदृशं कर्म?
12) गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम् इति पदे कः समासः कः विग्रहः?

**B) यथाभीष्टम् एकं सूत्रं व्याख्यात** **५ x १ = ५**

1) तथायुक्तं चानीप्सितम्
2) अधिशीङ्स्थासां कर्म

**C) यथाभीष्टम् एकं सूत्रं व्याख्यात** **१० x १ = १०**

1) प्रातिपदिकार्थलिङ्गपरिमाणमात्रे प्रथमा
2) कर्तुरीप्सिततमं कर्म

***

RKMVERI/DSS/MAIS/15-20/D2018/UT-1/SK-215

## SK-215 सिद्धान्तकौमुद्यां एकशेषप्रकरणम्

समयावधिः – एकहोरा        दिनाङ्कः- 07-08-2018        पूर्णाङ्काः - 25

---

**A) स्वेच्छया केषाञ्चन षट्-प्रश्नानामुत्तराणि लिखन्तु।** **1x6=6**

1) एकशेषपदस्य विग्रहं किम् ?
2) विरूपैकशेषस्योदाहरणं किम् ?
3) ऋक्पूरब्धूः पथामानक्षे अस्य सूत्रस्य सन्धिच्छेदं कुर्वन्तु ?
4) वसु शब्दाद् ईयसुन् प्रत्यये किं रूपम् ?
5) उर्वष्ठीवम् इत्यस्य विग्रहं दर्शय ?
6) द्विभूमः इत्यत्र केन सूत्रेण कश्च प्रत्ययः ?
7) अचतुरविचतुर…इति सूत्रं पूरयन्तु ?
8) प्रत्युरसमित्यत्र कः समासः? कस्मिन्नर्थे च ?

**B) केषाञ्चन त्रयाणाम्प्रक्रियानिर्देशपूर्वकं सिद्धिर्विधेया।** **3x3=9**

भ्रातरौ, हंसौ, पितरौ, विमलापम्, उपचतुराः,राजधुरा, द्वीपम् एतेषु त्रयः सुसाध्याः।

**C) अधोलिखितेषु कयोश्चिद्द्वयोः व्याख्या कर्तव्या।** **5x2=10**

1) त्यदादीनि सर्वैर्नित्यमिति सूत्रमुदाहरणपूर्वकं निर्दिशन्तु।
2) सर्वसमासशेषप्रकरणस्य मूलवृत्तिं विलिखन्तु।
3) वृद्धो यूना तल्लक्षणश्चेदेवेति सूत्रं सोदाहरणं विवेचयन्तु।
4) सुपां सुपा तिङां नाम्ना….इति कारिकां प्रपूर्य सोदहरणं प्रतिपादयन्तु।

***

RKMVERI/DSS/MAIS/14-19/D2018/UT-1/SK-225

## SK-225 सिद्धान्तकौमुद्यां सन्नन्तप्रकरणम्

समयावधिः – एकहोरा, दिनाङ्कः- 03-08-2018 पूर्णाङ्काः - 25

---

**A) स्वेच्छया केषाञ्चन षण्णां प्रश्नानाम् उत्तरं लिखन्तु। 1x6=6**

1) सन्नन्तपदस्यार्थः कः ?
2) सन्नर्थः कः ?
3) अत्तुमिच्छतीति विग्रहे सन्नन्तं रूपं किम् ?
4) दिदीषते इत्यत्र गुणः कथन्न ?
5) दिद्युतिषते अत्र केन सूत्रेण सम्प्रसारणम् ?
6) पिपावयिषति इत्यत्र केन सूत्रेण इत्वं भवति ?
7) व्युपधात्पदस्य व्युत्पत्तिः का ?
8) किरश्च पञ्चभ्योऽत्र के पञ्च धातवः ?

**B) केषाञ्चन त्रयाणां प्रयोगाणाम्प्रक्रियानिर्देशपूर्वकं सिद्धिर्विधेया। 3x3=9**

पिपठिषति, तितरीषति, ईप्सति, अधिजिगापयिषति, मुमूर्षति एतेषु त्रयः सुसाध्याः।

**C) अधोलिखितेषु कयोश्चिद्द्वयोः व्याख्या कर्तव्या। 5x2=10**

1) सन्प्रत्ययः केष्वर्थेषु भवतीति सूत्रनिर्देशपूर्वकं निर्दिशतु।
2) उपधाकार्यं हि द्वित्वात्प्रबलम्, कथं भवतीति ज्ञापकपुरस्सरं प्रतिपादयतु।
3) स्तौतिण्योरेवेति सूत्रं सोदाहरणं विवेचयन्तु।
4) शैषिकान्मतुबर्थीयाच्छैशिको मतुबर्थिकः इति कारिकां प्रपूर्य सोदहरणं प्रतिपादयतु।

***

RKMVERI/DSS/MAIS/15-20/D2018/SK-227/UT-2

## SK-227 सिद्धान्तकौमुद्याम् कृत्यप्रकरणात् पूर्वकृदन्तप्रकरणं यावत्

समयावधिः - एकहोरा पूर्णाङ्काः - 25

---

**A) यथेष्टं षण्णाम् प्रश्नानाम् एकेन वाक्येन उत्तरं लिखत। 1x6=6**

1) कृत्संज्ञा केन विधीयते।
2) वास्तव्य इत्यत्र कस्मिन्नर्थे कः कृत्प्रत्ययः।
3) दुर्यानम् इत्यत्र णेर्विभाषा कथं न प्रवर्तते।
4) शस्यमिति रूपं कथम्।
5) न गदमद....इत्यत्र यम्-धातोः ग्रहणं किमर्थम्।
6) उपसर्या गौः नाम का।
7) चुरादिगणीयधातोः परं नित्यं णिच् भवति न वा।
8) ई च खनः इत्यत्र सुपठः कः।

**B) यथेष्टं त्रयाणां प्रश्नानां व्याख्यानं कुरुत। 3x3=9**

1) कृत्यचः इति सूत्रं व्याख्यात।
2) हलश्चेजुपधात् इति सूत्रं व्याख्यात।
3) देयम् इति रूपं साधयत।
4) वदः सुपि क्यच् च इति सूत्रं व्याख्यात
5) एतिस्तुशास्वृजुषः क्यप् इति सूत्रं व्याख्यात।

**C) यथेष्टम् एकं प्रश्नम् उत्तरत। 1x10=10**

1) वासरूपोऽस्त्रियाम् इति सूत्रं समाश्रित्य लघुप्रबन्धं लिखत।
2) कृत्यप्रत्ययस्थं यत्प्रत्ययविधायकं सूत्रं व्याख्यात।

***

RKMVERI/DSS/MAIS/18-23/D2018/UT-1/SK-236

**SK-236 – लघुसिद्धान्तकौमुदी अजन्तपुंलिङ्गान्ता**

समयः - एकहोरा | पूर्णाङ्काः - २५

---

**A) एकादश समाधेयाः** **१*११=११**

1) अणुदित्सूत्रे अण् इत्यनेन केषां वर्णानां ग्रहणम्?
2) तपरस्तत्कालस्य इति सूत्रस्य अर्थं लिखत?
3) एङि पररूपम् इति सूत्रस्य अर्थं लिखत?
4) अनुनासिकसंज्ञा कस्य भवति?
5) उपदेशपदस्य कः अर्थः?
6) लघुसिद्धान्तकौमुद्या मङ्गलश्लोकं लिखत।
7) लघुसिद्धान्तकौमुद्याः प्रणेता कः?
8) ह्रस्वदीर्घप्लुतसंज्ञाविधायकं सूत्रं किम्?
9) लृकारस्य द्वादश भेदाः कुतः?
10) इको यणचि इति सूत्रस्यार्थं लिखत।
11) सवर्णग्राहकं सूत्रं किम्?
12) गुणसंज्ञाविधायकं सूत्रं किम्?
13) वृद्धिसंज्ञाविधायकं सूत्रं किम्?
14) तव+ऌकारः = ?
15) टिसंज्ञाविधायकं सूत्रं किम्?

**B) त्रयः समाधेयाः।** **३*३=९**

1) माहेश्वराणि सूत्राणि लिखत।
2) वर्णानामुच्चारणस्थानानि लिखत।
3) के प्रादयः?
4) उवर्णस्य कति भेदाः, तान् च तालिकया प्रदर्शयत।
5) ओकारस्य वकारस्य च आभ्यन्तरप्रयत्नं बाह्यप्रयत्नं च लिखत।

**C) यथेच्छमेकमुत्तरत।** **५*१=५**

1) आदिरन्त्येन सहेता इति सूत्रं व्याख्यात।
2) आभ्यन्तरप्रयत्नस्य बाह्यप्रयत्नस्य च परिचयः देयः।

***

RKMVERI/DSS-WW/MAIS/18-23/D2018/UT-1/SK - 236

## SK-236 लघुसिद्धान्तकौमुदी अजन्तपुंलिङ्गान्ता (सूत्रसंख्या - 216)

कालावधिः – होरा पूर्णाङ्काः – 25

---

**A) अत्र एकादशसु नव समाधत्त। 1x9=9**

1) समाहारः स्वरितः इति सूत्रे कयोः समाहारः ?
2) अष्टाध्यायीसूत्रस्य क्रमः 1 /4 /5 इति चेत् किं बोधयति ?
3) मुखनासिकावचन इति पदस्य अर्थः कः ?
4) माहेश्वरसूत्रेषु कुत्र अकारः इत्संज्ञकः ?
5) शिवसूत्रेषु पञ्चमं सूत्रं किम् ?
6) कस्य लोपः भवति ? केन सूत्रेण ?
7) जश् इति संज्ञायाः संज्ञिनः के ?
8) ऌवर्णस्य कति भेदाः ? कुतः ?
9) बाह्यप्रयत्नः कतिविधः ?, के च ते ?
10) ह्रस्वदीर्घप्लुतसंज्ञाविधायकं सूत्रं किम् ?
11) उपध्मानीयः क उच्यते ?

**B) चतुर्षु द्वौ समाधत्त। 3x2=6**

1) पश्यन्ति इत्यत्र पदसंज्ञा कस्य भवति ?
2) (दृश्-धातोः अथवा दृश्+झि इति प्रकृतिप्रत्ययरूपतिङन्तसमुदायस्य) युक्त्यनुसारं प्रतिपाद्यताम् ।
3) उच्चारणस्थानानां विवरणं देयम् ।
4) तालिकया ऐ-वर्णस्य भेदान् प्रदर्शयत ।
5) टकारतकारयोः परस्परं सवर्णसंज्ञा भवति वा ? स्वमतं स्पष्टीकुरुत ।

**C) द्वयोरेकं समाधत्त। 10x1=10**

1) आदिरन्त्येन सहेता इति सूत्रं व्याख्यात ।
2) अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रं व्याख्यात ।

***

## SK-241 महाभाष्ये 2,3,4 आह्निकानि

Time – One hour | Marks – 25

**A) यथेष्टं षण्णाम् एकेन वाक्येन उत्तरं लिखत-** **1x6=6**

1) अकारः किमर्थमाकारं न गृह्णीयात् ?
2) विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इत्यस्य ज्ञापकं किम् ?
3) अनुवृत्ति निर्देशे सवर्णाग्रहणं केन कारणेन ?
4) आन्यभाव्यमकारस्य। कैः कारणैः ?
5) ऌकारोपदेशः किमर्थः ?
6) साध्वनुकरणेषु कथं परिहारः ?
7) कुतः अपशब्दः प्रकृतिः न भवति ?
8) सूत्रभेदेन प्लुत्याद्यर्थस्य खण्डनं किमिव अस्ति ?

**B) यथेष्टं त्रयाणां प्रशनानां उत्तरं लिखत-** **3x3=9**

1) द्रव्यवच्चोपचाराः।
2) आन्यभाव्यं तु कालशब्दव्यवायात्।
3) शकुनिवत्स्युः।
4) न्याय्यभावात् कल्पनं संज्ञादिषु।
5) खत्प्रतिषेधाच्च।

**C) यथेष्टं द्वयोः उत्तरं लिखत-** **5x2=10**

1) आकृतिग्रहणात्सिद्धम्।
2) व्यक्तिपक्षे कथमकारस्यैकत्वम् ।
3) प्लुत्याद्यर्थः ऌकारोपदेशः इति प्रतिपादयत।

***

RKMVERI/DSS/MAIS/14-19/D2018/UT-1/SK-242

**SK-242 - महाभाष्ये १-५० आह्निकानि यावत्**

समयावधिः – एकहोरा | दिनाङ्कः 31.07.18 | पूर्णाङ्काः - 25

---

**A) यथेष्टं षण्णां प्रश्नानाम् उत्तरं लिखत ।** **1x6=6**

1) ईदूदेद्द्विवचनमित्यत्र विशेष्य-विशेषणभावस्य व्यत्यासेन प्राप्तेषु चतुर्पक्षषु कः पक्षः भाष्यसम्मतः ? किञ्च तत्स्वरूपम् ?
2) सिद्धः प्लुतः स्वरसन्धिषु इति स्वरसन्धौ प्लुतस्य सिद्धत्वे प्रमाणं लिखत ।
3) कथं ज्ञायते प्रगृह्यसञ्ज्ञायां प्रत्ययलक्षणं न भवतीति ?
4) अदसो मात् इत्यत्र किमर्थो योगविभागः ?
5) अदोऽभवत् तिरोऽभवत्'ओत्' इयनेन प्राप्तस्य दोषवारणं कथम् ?
6) उञेकादेश उञ्ग्रहणेन गृह्यते न वा ?
7) घुसञ्ज्ञायां प्रकृतिग्रहणं किमर्थं कर्तव्यमिति ?
8) दैप् नास्ति तत्स्थाने दाबेव पठ्यते चेत् तदा अवदायति कथं सिध्येत् ?

**B) काश्चन त्रयान् समाधत्त ।** **3x3=9**

1) घुसञ्ज्ञायां दीङः प्रतिषेधः वक्तव्यो न वा यथा भाष्यं प्रतिपादयत ।
2) शिदंशे प्रकृतिग्रहणं नापेक्षते इति निरूपयत ।
3) ईदूदेद् इत्यत्र तदन्तविधेःचतुष्-पक्षान् उद्भाव्य सिद्धान्तपक्षम् उपस्थापयत ?
4) उञः, ऊँ इत्यत्र किमर्थो योगविभागः भाष्याशयं विशदयत ।
5) ओत् इति सूत्रं व्याख्यात ।

C) एषु यथेष्टं प्रश्नद्वयस्य व्याख्यानं कुरुत । 5x2=10

1) ईदूतौ सप्तमीत्येव इति कारिकां विलिख्य विशदयत।
2) निपात एकाजनाङ् इतिसूत्रं भाष्यदिशा प्रतिपादयत।
3) अदसो मात् इति सूत्रं व्याख्यात।

***

RKMVERI/DSS/MAIS/15-20/D2018/UT-1/SK-255

## SK-255- परिभाषेन्दुशेखरे १-५० परिभाषाः

समयावधिः – एकहोरा, दिनाङ्कः 31.07.2018 पूर्णाङ्काः - 25

---

**A) यथेष्टं षण्णां प्रश्नानाम् उत्तरं लिखत । 1x6=6**

1) परिभाषेन्दुशेखरस्य विग्रहःपक्षद्वये लिखत ।
2) यथाश्रुतग्रहिप्रतिपत्रपेक्षः इत्यस्य समासं निरूपयत ।
3) कार्यकालपक्षे सञ्ज्ञाशास्त्राणां लक्ष्यसंस्कारकबोधः क्व भवति ?
4) पूर्वत्रासिद्धम् इति सूत्रे केषां सूत्राणां त्रिपाद्याम् अप्रवृतिः आशङ्किता भाष्यकारैः ?
5) अनुबन्धाः अनेकान्त इति पक्षे हलन्त्यम् इत्यत्र अन्त्यशब्दस्य कः अर्थः ?
6) वर्णास्त्रसावनञः इत्यादेः सर्वादेशः कुतो न भवति ?
7) कर्त्तरि कर्मव्यहारे इत्यत्र कर्म इत्यनेन किम् गृह्यते ?
8) कार्यमनुभवन् हि कार्यीनिमित्ततया नाश्रीयते इत्यत्र कार्यमनुभवन् इति पदाभावे क्व दोषस्स्यात् ?
9) स्थानिवदादेशोऽनल्विधौ इति आदेशपदग्रहणेन किं ज्ञाप्यते ?

**B) काञ्चन त्रयान् समाधत्त । 3x3=9**

1) कार्यकालपक्षे अयादिभ्यः परैव प्रगृह्यसञ्ज्ञा इत्यस्य आशयं यथाग्रन्थं प्रतिपादयत
2) नानुबन्धकृतसारूप्यम् इति पारिभाषां विशदयत ।
3) उभयगतिरिह भवति इति परिभाषायाः अवतरणस्थ दोषमुद्भाव्य परिभाषया समाधाय परिभाषायाः ज्ञापकञ्च लिखत ।
4) कार्यकालपक्षे 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इत्यस्य सङ्गतिः कथम् ?
5) कार्यमनुभवन् हि कार्यीनिमित्ततया नाश्रीयते इति परिभाषां यथाग्रन्थं प्रतिपादयत ।

**C) एषु यथेष्टं प्रश्नद्वयस्य व्याख्यानं कुरुत। 5x2=10**

1) सञ्ज्ञाशास्त्रस्य तु कार्यकालपक्षे न पृथग्वाक्यार्थबोधः, किन्तु प्रदेशवाक्यार्थेन सहैव अतएव 'अणोऽप्रगृह्यस्य' इत्येतदेकवाक्यतापन्नम् 'अदसो मात्' इत्येतद् प्रति न मुत्वाद्यसिद्धमिति ससन्दर्भं निरूपयत ।
2) एकान्ताः अनुबन्धाः इति सिद्धान्तं निरूप्य अत्र पक्षे आगतान् दोषान् वारयत ।
3) यदागमास्तद्गुणीभूता इति परिभाषायाःवर्णग्रहणेऽप्रवृतिं निरस्य अनित्यताम् उपपादयत ।

***

## SK-265 लघुशब्देन्दुशेखरम्

समयावधिः – एकहोरा, दिनाङ्कः- 02/08/2018 पूर्णाङ्काः - 25

---

**A) स्वेच्छया केषाञ्चन षण्णां प्रश्नानाम् उत्तरं लिखन्तु। 1x6=6**

1) सतीदेव्याः गर्भजः कः ?
2) मङ्गलाचरणे नागेशः कं नमति ?
3) मनोरमोमार्धदेहम् इत्यस्य पदस्य विग्रहं प्रदर्शयतु।
4) महेश्वरसूत्रेषु संहिताकार्यं कथन्न?
5) चतुर्दशसूत्राणां कथं संज्ञासूत्रत्वं सङ्गच्छते ?
6) णकारविषयाचार्यप्रवृत्तिर्ज्ञापयतीत्यत्र आचार्यपदेन कस्य ग्रहणम् ?
7) धात्वर्थं समुपादिष्टमित्यस्य तात्पर्यं किम् ?
8) वर्णानामुपदेशः किमर्थं कृतम् ?
9) आचार्यस्य का शैली लक्ष्यते ?

**B) केषाञ्चन त्रयाणामुत्तरं ददातु । 3x3=9**

1) ऋक्-तन्त्रव्याकरणे शाकटायनेन किम्प्रोक्तम् ?
2) आम्नायसमाम्नायशब्दयोः वेदे एव प्रसिद्धत्वादत्र चतुर्दशसूत्रेषु वर्णसमाम्नायेति कथं व्यवहारः?
3) वर्णेनाप्यनर्थकेन न भवितव्यमिति भाष्यवचनस्य तात्पर्यं बोधयतु।
4) नृत्तावसाने........इति कारिकां प्रपूर्य भावार्थं निर्दिशतु।
5) अत्र सर्वत्र सूत्रेषु ........इति कारिकां प्रपूर्य शेखरदिशा प्रबोधयतु ।

**C) स्वेच्छया कयोश्चिद्द्वयोः समाधानं कुर्वन्तु। 5x2=10**

1) शेखरदिशा मुनित्रयमिति व्याख्यायताम् ।
2) रप्रत्यहारविषये नागेशमतं विलिखन्तु ।

***

**SK-267 लघुशब्देन्दुशेखरे कारकप्रकरणम्।**

कालावधिः - एकहोरा　　　　दिनाङ्कः 30/07/2018　　　　पूर्णाङ्काः - 25

---

**A) सप्तसु पञ्चैव समाधेयाः।　　　　1*5=5**

1) कर्तृतृतीयाविभक्तेरर्थः कः।
2) करणतृतीयाविभक्तेरर्थः कः।
3) हेतुलक्षणं लिखत।
4) करणलक्षणं लिखन्तु।
5) रामेण वाणेन हतो वाली इति वाक्यस्यार्थः कः।
6) येनाङ्गविकारः इति सूत्रस्थस्य अङ्गविकारः इत्यस्य कोऽर्थः।
7) सहार्थः कः।

**B) त्रिषु द्वयं समाधत्त।　　　　5*2=10**

1) कारकस्वरूपं यथाग्रन्थं प्रकाशयत।
2) सहयुक्तेऽप्रधाने इति सूत्रस्याशयं प्रकटयत।
3) इत्थम्भूतलक्षणे इति सूत्रस्यार्थं वर्णयत।

**C) द्वयोरेकं समाधत्त।　　　　1*10=10**

1) साधकतमं करणम् इति सूत्रं यथाग्रन्थं व्याख्यात।
2) स्वतन्त्रः कर्ता इति सूत्रस्य यथाग्रन्थं तात्पर्यं प्रकटयत।

***

RKMVERI/DSS/MAIS/14-19/D2018/UT-1/SK-273

## SK-273 वैयाकरणभूषणसारे

Time – One hour                                                                 Marks – 25

**A) यथेष्टं षण्णाम् एकेन वाक्येन उत्तरं लिखत-**                                    **1x6=6**

1) सुपां धातुना समासस्योदाहरणमेकं लिखत ?
2) सिद्धान्ते अव्ययीभावलक्षणं किम् ?
3) पदोद्देश्यकविधित्वं केष्वस्ति ?
4) प्राप्तोदकः इत्यस्य शाब्दबोधः कः ?
5) व्यपेक्षावादिनां मते कुत्र व्युत्पत्त्यन्तरकल्पना अपेक्षिता ?
6) चित्रगु इत्यत्र चरमपदे लक्षणायां कथं बहुव्रीह्यसम्भवः ?
7) लक्षणावादिनां मते विग्रहवाक्यस्य प्रयोगनियमः कदा ?
8) प्रातिपदिकसंज्ञारूपं कार्यं किमनुमापयति ?

**B) यथेष्टं त्रयाणां उत्तरं लिखत-**                                    **3x3=9**

1) प्राचिनोक्तसमासलक्षणस्य असम्भवः कथम् ?
2) वृत्तेस्त्रिविधभेदाः के ?
3) उदकाभिन्नप्राप्तिरिति बोधोत्तरं ग्रामे लक्षणा कुतः न सम्भवति ?
4) षष्ठ्यर्थबहुव्रीहो कथं लक्षणया निर्वाहः ?
5) लक्षणायामपि कथं समासे वचनं विना विशेषणाद्ययोगः सिद्ध्यति ?

**C) द्वयोः उत्तरं लिखत-**                                    **5x2=10**

1) वृत्तिभेदाः।
2) प्राप्तोदकः इत्यत्र व्यपेक्षावादिमते दोषाः।
3) अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्यन्तरकल्पनां विशदयत।

***

## SK-281 वाक्यपदीये ब्रह्मकाण्डम्

समयावकाशः - होरा　　　　　　　　　　　　　　　　　　　　अङ्काः – 25

---

**A) अधः प्रदत्तेषु यथेच्छं पञ्च कारिकाः पूरयत। 　　　　　　　　　　1x5=5**

1) अनादिनिधनं.....॥
2) एकस्य..........॥
3) तस्यार्थवाद.......॥
4) आसन्नं...........॥
5) तद्वारम्........॥
6) इदमाद्यं.........॥
7) प्रत्यस्तमित.......॥

**B) अधः यथेष्टं पञ्चानां वाक्येन उत्तरं लिखत। 　　　　　　　　　　1x5=5**

1) कथं ब्रह्म पृथक्त्वेन इव वर्तते ?
2) अतीतविपर्यासः व्याकरणे किं पश्यति ?
3) अर्थप्रवृत्तितत्त्वानां शब्दाः कथं निबन्धनम् ?
4) ब्रह्मणः अनुकारः कः ?
5) सर्ववादाविरोधिना का ?
6) "विद्यानामेषा विद्या परायणम्" कुतः ?
7) ज्ञानसंस्कारहेतवः के ?

**C) नीचैः यथेष्टं कारिकात्रयं व्याख्यात। 　　　　　　　　　　3x3=9**

1) अध्याहिकलां यस्य कालशक्तिमुपाश्रिताः।
   जन्मादयो विकाराः षड् भावभेदस्य योनयः॥
2) स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः
   तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः॥
3) भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता।
   शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते॥
4) वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम्
   व्यतीत्यालोकतमसी प्रकाशं यमुपासते॥
5) नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
   सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः॥

**D) निम्नलिखितेषु एकस्य उत्तरं लिखत। 　　　　　　　　　　6x1=6**

1) हरिकृतां व्याकरणस्तुतिं निरूपयत।
2) कालशक्तिः।
3) अष्टपदार्थी।

# SK-341 तर्कसङ्ग्रहो न्यायबोधिनीसहितः

समयावधिः-एकहोरा　　　　सत्रम् ७　　　　पूर्णाङ्काः-२५

---

**A) दश समाधेयाः**　　　　**१ x १० = १०**

1) तर्कसङ्ग्रहः किमर्थं प्रणीतः?

2) आकाशस्य लक्षणं किम्?

3) कालस्य लक्षणं किम्?

4) दिशः लक्षणं किम्?

5) मनसः परिमाणं किम्?

6) रूपस्य लक्षणं किम्?

7) रूपं कस्मिन् द्रव्ये अस्ति?

8) जले कः रसः?

9) कारणं कतिविधम्?

10) समवायिकारणलक्षणं किम्?

11) साधारणसव्यभिचारस्य लक्षणं किम्?

12) उपाधिलक्षणं किम्?

**B) यथाभीष्टम् एकां परिभाषां व्याख्यात**　　　　**५ x १ = ५**

1) इन्द्रियार्थसन्निकर्षः　　　　2) केवलव्यतिरेकि लिङ्गम्

**C) यथाभीष्टम् एकां परिभाषां व्याख्यात**　　　　**१० x १ = १०**

1) अनुमानम्

2) हेत्वाभासः

RKMVERI/DSS/MAIS/16-21/D2018/UT-1/SK-344

## SK-344 न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डः पस्पशाह्निकं च

समयावधिः-एकहोरा सत्रम् ९ पूर्णाङ्काः-२५

---

**A) दश समाधेयाः** **१ x १० = १०**

1) मङ्गलसत्त्वेऽपि समाप्त्यभावः कथं समाधीयते?
2) मङ्गलस्य अदृष्टफलकत्वं कुतो न?
3) स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य मङ्गलाचरणे किं कारणम्?
4) सादृश्यस्य सामान्ये अन्तर्भावः न – कथम्?
5) द्रव्यत्वजातिसिद्धौ अनुमानस्य आकारः कः?
6) भ्रमणादीनां कुत्र अन्तर्भावः?
7) सामान्यलक्षणे नित्यत्वम् इति किमर्थम्?
8) सामान्यलक्षणे अनेकपदं किमर्थम्?
9) सत्ताजातिः कुत्र वर्तते?
10) द्रव्यत्वजातिः कीदृशी जातिः?
11) विशेषस्य लक्षणं किम्?
12) विशेषस्य विशेषाद् भेदाय विशेषान्तरापेक्षा कुतो न?

**B) यथाभीष्टम् एकं समाधत्त** **५ x १ = ५**

1) न्यायसिद्धान्तमुक्तावल्याः मङ्गलाचरणं व्याख्यात।
2) न्यायसिद्धान्तमुक्तावलीदृशा समवायं साधयत।

**C) यथाभीष्टम् एकं सूत्रं व्याख्यात** **१० x १ = १०**

1) मङ्गलवादं विशदयत।
2) ईश्वरसिद्धिं कुरुत।

***

RKMVERI/DSS-WW/MAIS/16-21/D2018/UT1/SK-344

**SK-344 न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डः**

| कालावधिः - एकहोरा | दिनाङ्कः 6.8.18 | पूर्णाङ्काः - 25 |
|---|---|---|

**A) अष्टसु षट् समाधेयाः।** **1*6=6**

1) मुक्तावल्याः रचयिता कः।
2) कारिकावल्याः मङ्गलपद्यं लिखन्तु।
3) चूडामणीकृतविधुः इत्यस्य विग्रहवाक्यं लिखन्तु।
4) सामान्यस्य लक्षणं लिखन्तु।
5) अपरत्वस्य लक्षणं लिखन्तु।
6) परत्वस्य लक्षणं लिखन्तु।
7) समवायस्य लक्षणं लिखन्तु।
8) विशेषस्य लक्षणं लिखन्तु।

**B) पञ्चसु त्रयं समाधत्त।** **3*3=9**

1) सभेदं पदार्थस्वरूपं प्रतिपादयत।
2) कर्मस्वरूपं सभेदं प्रतिपादयत।
3) गुणलक्षणं विलिख्य तद्भेदान् लिखत।
4) सपदकृत्यं जातिलक्षणं प्रतिपादयत।
5) सादृश्यस्य पदार्थत्वं व्यवस्थाप्य खण्डयन्तु।

**C) त्रिषु द्वयं समाधत्त।** **5*2=10**

1) शक्तेः पदार्थत्वं व्यवस्थाप्य खण्डयन्तु।
2) तमसः द्रव्यत्वं व्यवस्थाप्य खण्डयन्तु।
3) सभेदं द्रव्यपदार्थं प्रतिपादयन्तु।

***

RKMVERI/DSS/MAIS/15-20/D2018/UT1/SK-345

**SK- 345 न्यायसिद्धान्तमुक्तावल्यामनुमानखण्डः शब्दखण्डश्च**

| कालावधिः - एकहोरा | दिनाङ्कः 4. 8. 18 | पूर्णाङ्काः - 25 |
|---|---|---|

**A) सप्तसु पञ्चैव समाधेयाः।** **1*5=5**

1) अनुमितौ करणं किम्।
2) अनुमितौ व्यापारः कः।
3) हेत्त्वाभासस्य किं लक्षणम्।
4) ज्ञायमानं लिङ्गम् अनुमितौ कुतः न करणम्।
5) परामर्शस्य लक्षणं लिखत।
6) शाब्दबोधे करणं किम्।
7) शाब्दबोधे व्यापारः कः।

**B) त्रिषु द्वयं समाधत्त।** **5*2=10**

1) येन सम्बन्धेन साध्यं तेनैव सम्बन्धेन साध्यवान् बोध्यः इति ग्रन्थस्याशयं प्रकाशयत।
2) साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः इत्यस्याशयं लिखत।
3) येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यावृत्तित्वं बोध्यम् इत्यस्याशयं लिख।

**C) द्वयोरेकं समाधत्त।** **1*10=10**

1) सिद्धान्तव्याप्तिलक्षणे प्रतियोगितानवच्छेदकत्वानुसरणस्य फलं लिखन्तु।
2) अभावश्च प्रतियोगिव्यधिकरणो बोध्यः इति ग्रन्थस्य तात्पर्यं प्रतिपादयत।

***

# SK- 370 व्युत्पत्तिवादे प्रथमाकारके अभेदान्वयभागः

कालावधिः - एकहोरा दिनाङ्कः 2/08/2018 पूर्णाङ्काः - 25

---

**A) सप्तसु पञ्चैव समाधेयाः।** **1*5=5**

1) व्युत्पत्तिवादशब्दस्य का व्युत्पत्तिः।
2) व्युत्पत्तिवादग्रन्थस्य लेखकः कः।
3) एकत्वं नाम किम्।
4) त्रयः समुदिताः हेतुः इत्यत्र हेतुपदं किं परम्।
5) पितरो देवताः इत्यत्र कथम्भूतं देवतात्वम्।
6) साजात्यं नाम किम्।
7) भासते इत्यत्र आख्यातार्थः कः।

**B) त्रिषु द्वयं समाधत्त।** **5*2=10**

1) स्वसमानविभक्तिकत्वं परिष्कुर्वन्तु।
2) सम्पन्नो व्रीहिः इत्यत्र एकत्वस्य कुत्रान्वयः इति यथाग्रन्थं प्रतिपादयत।
3) कुत्र समानवचनकत्वं भवतीति यथाग्रन्थं प्रतिपादयत।

**C) द्वयोरेकं समाधत्त।** **1*10=10**

1) अभेदः क्व संसर्गमर्यादया भासते इति यथाग्रन्थं विस्तरेण प्रतिपादयत।
2) शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति ग्रन्थस्याशयं प्रकाशयत।

***

RKMVERI/DSS/MAIS/18-22/D2018/UT-1/SK-411

**SK-411 रघुवंशम्**

Duration – 1 Hours | Full Marks - 25

**A) एकेन वाक्येन समाधत्त।** **1x13=13**

1) पूर्वसूरिपदेन कालिदासः कान् अवदत् ?
2) मनुः केन उपमितः ?
3) दिलीपस्य प्रारम्भाः कैः उपमिताः ?
4) सूर्यवंशीयाः कथं देहं त्यजन्ति स्म ?
5) दिलीपस्य अर्थसाधनद्वयं किम् ?
6) आफलोदयकर्मणाम् इत्यस्य समासः कथम् ?
7) दिलीपः किमर्थं बलीम् अग्रहीत् ?
8) कविः किमर्थं पार्वतीपरमेश्वरौ वन्दते ?
9) रघुवंशम् इत्यत्र विग्रहः कथम् ?
10) दिलीपः कीदृशः धर्मः इति उत्प्रेक्षितः ?
11) रघुवंशीयाः किमर्थं मितभाषिणः ?
12) मेरुरिव उर्वीम् आक्रम्य स्थितेः किमंशत्रयं कारणम् ?
13) महीक्षिताम् उपमानानि कानि ?
14) कैः प्रचोदितः कविः रघुवंशं रचयामास ?
15) रघुवंशं सन्तः श्रोतुमर्हन्ति किमर्थम् ?

**B) अभीष्टान् षट् श्लोकान् पूरयत।** **2x6=12**

1) तस्य संवृत........।
2) प्रजानामेव.........।
3) यथाविधि..........।
4) रघूणाम्...........।
5) अथवा.............।
6) क्व सूर्य............।
7) सेना...............।
8) रेखामात्रम्........।

***

RKMVERI/DSS/MAIS/17-22/D2018/UT-1/SK-413

**SK-413 अभिज्ञानशाकुन्तलम्।**

समयावधिः - होरात्मकः पूर्णाङ्काः - 25

---

**A) यथेष्टं दशानां प्रश्नानाम् एकेन वाक्येन उत्तरं लिखत- 1x10=10**

1) अभिज्ञानशाकुन्तलं कीदृशं रूपकम्?
2) किमर्थं विदुषां आ परितोषाद् प्रयोगविज्ञानं साधु न मन्ये ?
3) मृगः कथं राज्ञः प्रयत्नप्रेक्षणीयः संवृतः?
4) आश्रममृगोऽयं न हन्तव्यो, न हन्तव्यः- कस्य उक्तिः?
5) सा खलु विदितभक्तिं मां महर्षेः कथयिष्यति- सा का?
6) दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः- कस्य उक्तिः?
7) इयं स्वयंवरवधूः सहकारस्य- स्वयंवरवधूः का?
8) कस्मिन् समये अभिज्ञानशाकुन्तलं नाटकम् अभिनीतमस्ति?
9) तवास्मि गीतरागेण..... श्लोकं पूरयत।
10) अभिज्ञानशाकुन्तले कति अङ्काः विद्यन्ते?
11) मुहुरनुपतति स्यन्दने दत्तदृष्टिः- दत्तदृष्टिः कः ?
12) बाहुस्फुरणस्य फलं तपोवने कथं प्राप्तुं शक्यम्?

**B) यथेष्टम् एकस्य उत्तरं लिखत। 1x5=5**

1) असाधुदर्शी खलु तत्र भवान् काश्यपः- विचारय।
2) मङ्गलश्लोकं व्याख्यात।

**C) यथेष्टम् एकस्य उत्तरं लिखत। 1x10=10**

1) अकथितोऽपि ज्ञायते एवायमाभोगस्तपोवनस्येति- विचारय।
2) शकुन्तलायाः सौन्दर्यं राज्ञा यथा वर्णितं स्वभाषया प्रतिपादयत।

***

RKMVERI/DSS/MAIS/17-21/D2018/UT-1/SK-441

## SK-441 साहित्यदर्पणः

Duration – 1 Hours | Full Marks - 25

### A) एकेन वाक्येन समाधत्त। 1x5=5

1) किंसाधारण्येन काव्यत्वम् अङ्गीकरणीयम् ?
2) कौ आत्मार्थधर्मौ ?
3) काव्यात् धर्मप्राप्तिः कथम्  ?
4) वक्रोक्तिजीवितकारः कः ?
5) मुर्खत्वादयः इव काव्यदोषाः के ?
6) साहित्यदर्पणस्य काव्यफलैः फलवत्त्वं कुतः ?
7) विधेयाविमर्शस्य लक्षणं किम्?

### B) समासेन विवृणुत। 3x5=15

1) काव्ये रसप्राधान्यं वक्तुं किं किं प्रमाणवाक्यं श्रूयते  ?
2) ग्रन्थान्तरोक्तम् अस्फुटालङ्कारं खण्डयत ?
3) वाक्यलक्षणं निरूपयत ?
4) न्यक्कारो ह्ययमेव इत्यादौ विधेयाविमर्शदोषं स्फुटयत  ?
5) दोषास्तस्यापकर्षकाः, विवृणुत ?
6) मीमांसावचनेन महावाक्यं विवृणुत ?
7) रसाभासं सोदाहरणं दर्शयत ?

### C) एकं विशादयत। 5x1=5

1) मम्मटकाव्यलक्षणनिरासः ?
2) काव्यप्रयोजनम् ?

***

RKMVERI/DSS/MAIS/18-23/D2018/UT-1/SK-521

## SK-521 संस्कृतभाषाप्रवेशः

लेखनाय कालः – होरा पूर्णाङ्काः - 50

---

**A) यूयं यथेच्छं दशानाम् प्रश्नानाम् उत्तरं लिखत । १ x १० = १०**

1) छात्राः ग्रन्थम् पठन्ति। (यूयम् इदं वाक्यं कर्मणि प्रयुङ्क्त)
2) तव पिता पुत्रान् रक्षति। (वाक्यमिदं यूयं कर्मणि प्रयुङ्क्त)
3) शिशुः इन्दुम् पश्यति। (कृद्योगषष्ठीम् प्रयुज्य वाक्यस्य परिवर्तनम् भवन्तः कुर्वन्तु)
4) शिवस्य भक्ताः वाराणसीम् अगच्छन्। (क्तवतुप्रत्ययेन वाक्यम् परिवर्तयन्तु)
5) भगवान् विष्णुः मां रक्षति। (शानच्-प्रत्ययेन युष्माभिः वाक्यम् परिवर्त्यताम्)
6) कृषीवलः क्षेत्रे बीजानि वपति। (कृद्योगषष्ठीम् प्रयुज्य वाक्यस्य परिवर्तनं कुर्वन्तु)
7) स्वर्गे अमरैः अमृतम् पीयते। (वाच्यपरिवर्तनं कुर्वन्तु)
8) त्वं कथां वदसि। (वाच्यपरिवर्तनं कुर्वन्तु)
9) सीता वनम् अगच्छत्। (क्तप्रत्ययेन परिवर्त्यताम्)
10) देव्यौ वैकुण्ठे नारदम् अपश्यताम्। (क्तवतुप्रत्ययेन वाक्यम् परिवर्तयत)
11) भगिन्यौ विद्यालये परीक्षाम् अलिखताम्। (क्तवतुप्रत्ययेन वाक्यम् परिवर्तयत)
12) मम मित्रे युष्मान् नयतः। (युष्माभिः वाच्यपरिवर्तनं क्रियताम्)
13) गुरवः शिष्येभ्यः बहूनि फलानि ददति । (भवद्भिः वाच्यपरिवर्तनं क्रियताम्)

**B) भवन्तः यथाभिरुचि चतुर्णां शब्दानां रूपाणि लिखन्तु । (विभक्तेः त्रिषु अपि वचनेषु रूपाणि लेख्यानि भवन्ति) १ x ४ = ४**

1) देवीशब्दस्य द्वितीया विभक्तिः।
2) मातृशब्दस्य तृतीया विभक्तिः।
3) भगवत्-शब्दस्य षष्ठी विभक्तिः।
4) युष्मत्-शब्दस्य सप्तमी।
5) किम्-शब्दस्य स्त्रीलिङ्गे षष्ठी।
6) किम्-शब्दस्य पुल्लिङ्गे षष्ठी।

**C) यथाभिमतं त्रयाणां धातूनां रूपाणि युष्माभिः लिख्यन्ताम् । (सर्वेषु अपि पुरुषेषु वचनेषु च रूपाणि लेख्यानि भवन्ति) २ x ३ = ६**

1) पठ्-धातोः कर्मणिप्रयोगे विधिलिङ्।
2) कृ-धातोः कर्मणिप्रयोगे विधिलिङ्।

3) लभ्-धातोः कर्तरिप्रयोगे लोट्।

4) भू-धातोः कर्मणिप्रयोगे लङ् ।

5) सेव्-धातोः कर्मणिप्रयोगे लङ्।

**D) यथाच्छन्दम् पञ्च प्रश्नाः समाधेयाः (पञ्चानाम् प्रश्नानां समाधानं देयम्)। १ x ५ = ५**

1) पञ्चादिदशान्ताः संख्याः युष्माभिः लेख्याः।

2) त्रिंशदादिपञ्चत्रिंशदन्ताः संख्याः भवद्भिः लेख्याः।

3) षष्ठ्यद्याः पञ्चषष्ठ्यन्ताः संख्याः लेख्याः।

4) कविः नदीतीरे कवितां लिखति। – ल्युट्-प्रत्ययम् उपयुज्य कृद्योगषष्ठीम् प्रयुज्य वाक्यम् परिवर्तयत।

5) भक्ताः विष्णोः गुणान् वर्णयन्ति। – क्तप्रत्ययम् प्रयुज्य यूयं वाच्यपरिवर्तनं कुरुत।

6) कुपिताभिः महिलाभिः मार्जारः ताडितः। – क्तवतुप्रत्ययम् प्रयुज्य प्रयोगम् परिवर्तयत।

7) राधा देवीं कात्यायनीम् पूजयति। – ल्युट्-प्रत्ययमुपयुज्य कृद्योगषष्ठीप्रयोगेन वाक्यं यूयम् परिवर्तयत।

***

RKMVU/DSS-WW/MAIS/18-23/UT-1/SK- 521

## SK- 521 संस्कृतभाषाप्रवेशः

लेखनाय कालः – होरा　　　दिनाङ्कः– 07/08/2018　　　पूर्णाङ्काः - 25

---

**A) यथेच्छं दशवाक्यानां प्रयोगपरिवर्तनं कुरुत। 1x10=10**

1) शिष्यः सरलं ग्रन्थं पठति।
2) सुशीलः गायकः रामगुणं गायति।
3) भिक्षुकः देवं गोविन्दं प्रणमति।
4) पुरुषाः ईश्वरं कृष्णं वन्दन्ते।
5) क्रुद्धा चण्डिका अशुभं नाशयति।
6) नीचाः जनाः सदा कलहम् इच्छन्ति।
7) देवः इन्द्रः मेघात् जलं वर्षति।
8) शिवस्य भाले इन्दुः अस्ति।
9) क्रूरः दैत्यः मुनीन् विस्मरति।
10) शारदा रम्यां कवितां लिखति।
11) प्रखरः अग्निः आर्द्रं काष्ठं दहति।
12) मानवः महतीं कीर्तिम् अर्जति।

**B) यथेच्छम् अष्टानां रूपाणि लिखत। 1x8=8**

1) भगवत्-शब्दस्य द्वितीया।
2) कवि-शब्दस्य चतुर्थी।
3) मति-शब्दस्य चतुर्थी।
4) कर्मन्-शब्दस्य षष्ठी।
5) साधु-शब्दस्य सम्बोधनम्।
6) भू-शब्दस्य पञ्चमी।
7) गो-शब्दस्य षष्ठी।
8) दातृ-शबस्य पञ्चम
9) स्त्री-शब्दस्य द्वितीया।
10) लता-शब्दस्य सप्तमी।

**C) यथेच्छं सप्तानां रूपाणि लिखत। 1x7=7**

1) भू-धातोः लृटि प्रथमपुरुषः।
2) लभ्-धातोः लोटि उत्तमपुरुषः।
3) सेव्-धातोः लङि मध्यमपुरुषः।
4) पठ्धातोः विधिलिङि उत्तमपुरुषः।
5) शीङ्-धातोः लोटि मध्यमपुरुषः।
6) भू-धातोः विधिलिङि उत्तमपुरुषः।
7) अद्-धातोः लङि प्रथमपुरुषः।
8) लभ्-धातोः लिटि मध्यमपुरुषः।
9) पठ्-धातोः लोटि मध्यमपुरुषः।

सेव्-धातोः लृटि मध्यमपुरुषः।